"संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्रसूर्य्ययोः ।
पुष्ये स्नात्वा तु जाह्नव्यां कुलकोटीः समुद्धरेत् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

( यथा च भागवते । ४ । १२ । ४८ ।
"दिनक्षये व्यतीपाते संक्रमेऽर्कदिनेऽपि वा ।
श्रावयेत् श्रद्दधानानां तीर्थपादप्रियाश्रयः ॥")

व्यतीहारः, पुं, ( वि + अति + हृ + घञ् । "उपसर्गस्य घञीति ।" ६ । ३ । १२२ । इति दीर्घः । ) परीवर्त्तः । इति जटाधरः ॥ परस्परमेकजातीयक्रियाकरणम् । यथा, केशाकेशि । दण्डादण्डि । इत्यादि । इति व्याकरणम् ॥

व्यत्ययः, पुं, ( व्यत्ययनमिति । वि + अति + इ + "एरच् ।" ३।३।५६। इत्यच् ।) व्यतिक्रमः । तत्पर्य्यायः । व्यत्यासः २ विपर्य्यासः ३ विपर्य्ययः ४ । इत्यमरः ॥ ( यथा, भागवते । ७ । १० । ४४ ।
"परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥")

व्यत्यासः, पुं, ( व्यत्यसनमिति । वि + अति + अस् + घञ् । ) विपर्य्ययः । इत्यमरः ॥ ( यथा, हरिवंशे । २७ । २९ ।
"मात्रासि वञ्चिता भद्रे ! चरुव्यत्यासहेतुना ।
भविष्यति हि पुत्रस्ते क्रूरकर्म्मातिदारुणः ॥")

व्यथ, ष म ङ दुःखे । चाले । भये । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) दुःखं दुःखानुभवः । चालः कम्पनम् । ष, व्यथा । म, व्यथयति । ङ, व्यथते लोकः दुःखमनुभवति । कम्पते बिभेति वेत्यर्थः । केचित्तु दुःखभयचलनयोरिति पठित्वा भये चलनं भयचलनमित्याहुः । दुःखभयचलने इति पठित्वा दुःखभययोश्चलनमुत्पादनमिति गोविन्दभट्टः । इति दुर्गादासः ॥

व्यथकः, त्रि, ( व्यथयति पीडयतीति । व्यथ + णिच् + ण्वुल् । ) व्यथाकारी । यथा,—
"अन्नात्यानं व्यथकस्तु स्यान्मर्म्मस्पृगरुन्तुदः ॥"
इति हेमचन्द्रः ॥

( यथा, किराते । २ । ४ ।
"परिणामसुखे गरीयसि
व्यथकेऽस्मिन् वचसि क्षतौजसाम् ।
अतिवीर्य्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः ॥")

व्यथा, स्त्री, ( व्यथ + अङ् । टाप् । ) दुःखम् । इत्यमरः ॥ ( यथा, उत्तरचरिते । १ ।
"स्नेहं दयां तथा सौख्यं यदि वा जानकीमपि ।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ॥")

व्यथितः, त्रि, ( व्यथ + क्तः । ) पीडितः । ( यथा, ऋतुसंहारे । ६ । १९ ।
"कान्ताननद्युतिमुषामचिरोद्गतानां
शोभां परां कुरवकद्रुममञ्जरीणाम् ।
दृष्ट्वा प्रिये हि यथिकस्य भवेन्न कस्य
कन्दर्पबाणनिकरैर्व्यथितं हि चेतः ॥")
दुःखितः । यथा,—
"ततः प्रव्यथितो बाणो दुहितुः श्रुतदूषणः ।
त्वरितः कन्यकागारं प्राप्तोऽद्राक्षीत् यदूद्वहम् ॥"
इति श्रीभागवते बाणयुद्धे ६२ अध्यायः ॥

व्यध, ञौ य ताडे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-अनिट् । ) य, विध्यति शत्रुं शूरः । ञौ, अव्यात्सीत् । कश्चित्तु द्विर्भूतस्यानिकारीभूतयकारस्य व्यधिवकारो वर्ग्यः अन्यत्र तु दन्त्य इति मन्वानः सनि विव्यत्सतीत्याह । इति दुर्गादासः ॥

व्यधः, पुं, (व्यधनमिति । व्यध ताडे + "व्यधजपोरनुपसर्गे ।" ३ । ३ । ६१ । इत्यप् । ) वेधः । इत्यमरः ॥ ( यथा, सुश्रुते । १ । ३ ।
"सिराव्यधो धमनीनां गर्भिण्या व्याकृतिस्तथा ॥")

व्यध्यः, पुं, ( व्यधाय हितः । व्यध + यत् । ) धनुर्गुणः । यथा,—
"व्यध्यस्तु प्रतिकायः स्याज्जीवाज्या भारवं गुणः ॥")
इति त्रिकाण्डशेषः ॥

व्यध्वः, पुं, ( विरुद्धो अध्वा । प्रादिसमासः । उपसर्गादध्वनः । इत्यच् । ) कुत्सितपथः । तत्पर्य्यायः । दुरध्वः २ विपथः ३ कदध्वा ४ कापथः ५ । इत्यमरः ॥ कुपथः ६ असत्पथः ७ कुत्सितवर्त्म ८ । इति शब्दरत्नावली ॥ ( यथा, महाभारते । २ । ७० । २३ ।
"तूर्णं प्रत्यायनस्तेतान् कामं व्यध्वगतानपि ॥")

व्यप, क क्षये । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-अक०-सेट् । ) अन्तःस्थाद्ययुक्तः ॥ क, व्यापयति । इति दुर्गादासः ॥

व्यपदेशः, पुं, (वि + अप + दिश + घञ् ।) कपटः । इति हेमचन्द्रः ॥ ( यथा, साहित्यदर्पणे । ३ । १५५ ।
"कापि कुन्तलसंव्याससंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥")
नाम । इति त्रिकाण्डशेषः ॥ वाक्यविशेषः । यथा,—
"व्याजेनात्माभिलाषोक्तिर्व्यपदेश इतीर्य्यते ॥"
इत्युज्ज्वलनीलमणिः ॥

व्यपाकृतिः, स्त्री, अपह्नवः । अस्वीकारः । वि-अप-आङ् पूर्व्वकृधातोः क्तिप्रत्ययेन निष्पन्नम् ॥

व्यभिचारः, पुं, ( वि + अभि + चर + घञ् । ) कदाचारः । भ्रष्टाचारः । यथा,—
"व्यभिचारात्तु भर्त्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ।
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ॥"
इति मानवे ५ अध्यायः ॥
दोषविशेषः । तस्य लक्षणम् । साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारः । इति व्यधिकरणधर्म्मावच्छिन्नाभावचिन्तामणिः ॥ स त्रिविधः ; साधारणः १ असाधारणः २ अनुपसंहारी ३ । तत्र विपक्षवृत्तित्वं साधारणत्वम् । सर्व्वसपक्षव्यावृत्तत्वमसाधारणत्वम् । व्याप्तिग्रहानुकूलैकधर्म्मोपसंहाराभावो यत्र सद्धेत्वभिमतोऽनुपसंहार्य्यः । इति सव्यभिचारचिन्तामणिः ॥

व्यभिचारिणी, स्त्री, ( व्यभिचरति या । वि + अभि + चर + णिनिः । ङीप् । ) परपुरुषगामिनी । यथा,—
"हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् ॥
सोमः शौचं ददौ तासां गन्धर्व्वश्च शुभां गिरम् ।
पावकः सर्व्वभक्षित्वं मेध्या वै योषितो ह्यतः ॥"
इति याज्ञवल्क्ये । १ । ७०-७१ ॥
इति तु स्त्रीसामान्यविषयम् ।
"व्यभिचाराद्दतौ शुद्धिर्गर्भे त्यागो विधीयते ।
गर्भभर्त्तृवधे तासां तथा महति पातके ॥"
इति गारुडे ९५ अध्यायः ॥ * ॥
तस्याः परित्यागादि यथा । हारीतः । गर्भिणीमधोवर्णगां शिष्यसुतगामिनीं पापव्यसनासक्तां धनधान्यक्षयकरीं वर्ज्जयेत् । यमः ।
"स्वच्छन्दगा हि या नारी तस्यास्त्यागो विधीयते ।
न चैव स्त्रीवधः कार्य्यो न चैवाङ्गवियोजनम् ॥"
बृहस्पतिः ।
"हीनवर्णोपभुक्ता या त्याज्या वध्यापि वा भवेत् ॥"
विशेषयति मिताक्षरायां स्मृतिः ।
"ब्राह्मणक्षत्रियविशां भार्य्याः शूद्रेण सङ्गताः ।
अप्रजाता विशुद्ध्यन्ति प्रायश्चित्तेन नेतराः ॥"
एतत् बलात्कारविषयम् । इत्युद्वाहतत्त्वम् ॥ * ॥
तस्याः पुण्यकर्म्माणि निष्फलानि धनानधिकारित्वञ्च यथा । हरिवंशीयपुण्यकव्रतोपाख्याने ।
"दानोपवासपुण्यानि सततान्यप्यरुन्धति ! ।
निष्फलान्यसतीनां हि पुण्यकानि तथा शुभे ॥"
बृहन्मनुः ।
"अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात्तत् पिण्डं कृत्स्नमंशं लभेत च ॥"
भर्त्तुः शयनं पालयन्ती नान्यगामिनी । इति दायतत्त्वम् ॥

व्यभिचारी, [ न् ] पुं, ( व्यभिचरतीति । वि + अभि + चर + णिनिः । ) त्रयस्त्रिंशत्प्रकारशृङ्गारभावविशेषः । तद्यथा । निर्व्वेदः २ ग्लानिः २ शङ्का ३ असूया ४ मदः ५ श्रमः ६ आलस्यम् ७ दैन्यम् ८ चिन्ता ९ मोहः १० स्मृतिः ११ धृतिः १२ व्रीडा १३ चपलता १४ हर्षः १५ आवेगः १६ जडता १७ गर्व्वः १८ विषादः १९ औत्सुक्यम् २० निद्रा २१ अपस्मारः २२ सुप्तः २३ विबोधः २४ अमर्षः २५ अवहित्थः २६ उग्रता २७ मतिः २८ उपलम्भः २९ व्याधिः ३० उन्मादः ३१ मरणम् ३२ त्रासः ३३ वितर्कः ३४ । इति हेमचन्द्रः ॥ ( अस्य लक्षणादिकं यथा, साहित्यदर्पणे । ३ । १६८ ।
"विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्म्मग्नास्त्रयस्त्रिंशच्च तद्भिदाः ॥"
के ते इत्याह ।